# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –शास्त्री–३ (SEM-5) | प्रश्नपत्रम् – ६<br>(C.C- 3.5.10)<br>सन्दर्भग्रन्थः– अवयवः | गुणाः – ७० |
| विषयः – नव्यन्यायः | | |
| दिनाङ्कः – १५/१०/२०१९ | | समयः– ३ तः ६ |

(विभागः-1)

**प्र-1 द्वौ समाधेयौ ।** 10

1. सोदाहरणं परार्थानुमानं प्रतिपादयत ।
2. 'न समस्तरूपोपन्नलिङ्गप्रतिपादकवाक्यं न्यायः' व्याख्यात ।
3. हेतोः पञ्चधर्मान् विशदयत ।

**प्र-2 एकः समाधेयः ।** 10

1. तत्वचिन्तामणिकारोक्तं न्यायलक्षणं विशदयत ।
2. 'उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम्' व्याख्यात ।

(विभागः-2)

**प्र-3 द्वौ समाधेयौ ।** 10

1. प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाघटितत्वम् व्याख्यात ।
2. पृथिवी इतरेभ्यो भिद्यते गन्धवत्वात् – इत्यत्र मिश्रमतमुपस्थाप्यताम् ।
3. दीधितिकृतावयवलक्षणं व्याख्यात ।

**प्र-4 एकः समाधेयः ।** 10

1. प्रतिज्ञालक्षणं विलिख्य अव्याप्तिमाशङ्क्य परिहरत ।
2. अन्यूनानतिरिक्तपदविषयकत्वस्य दलप्रयोजनं कुरुत ।

(विभागः-3)

**प्र-5 द्वौ समाधेयौ ।** 10

1. अनुषङ्ग-अननुषङ्गपक्षे व्याख्यात ।
2. सर्वम् अभिधेयं प्रमेयत्वादित्यादौ अतिरिक्ताप्रसिद्धिं व्याख्यात ।
3. यथाग्रन्थं 'मैत्रः पचति' – इत्याकारिकानुमितिं व्याख्यात ।

**प्र-6 एकः समाधेयः ।** 10

1. परिष्कृतं प्रतिज्ञालक्षणं विशदयत ।
2. 'पदार्थतावच्छेदकजातौ हेत्वर्थस्यान्वयायोगाच्च' व्याख्यात ।

**(विभागः-4)**

**प्र-7 दश प्रश्ना: समाधेयाः ।** 10

1. व्यासज्यवृत्तिधर्मः कः ?
2. परार्थशब्दस्यार्थः कः ?
3. मणिकारीयन्यायलक्षणं किम् ?
4. कस्य परामर्शप्रयोजकता ?
5. का नाम उचितानुपूर्वी ?
6. दीधितिकृतन्यायलक्षणं किम् ?
7. कदा समूहालम्बनबोधो जायते ?
8. मणिकारीयावयवलक्षणं किम् ?
9. उदाहरणवाक्यं लिखत ।
10. उभयपदे कयोः ग्रहणम् ?
11. किन्नाम सापेक्षत्वम् ?
12. प्रतिज्ञालक्षणे कुत्र अतिव्याप्तिः ?
13. दीधितिकृतावयवलक्षणं किम् ?
14. किन्नाम प्रतिज्ञाद्यन्यतमत्वम् ?
15. सूत्रकृतप्रतिज्ञालक्षणं किम् ?

***************

## उत्तराणि

1. उभयवृत्तिधर्मः ।
2. मध्यस्थानुमितिजनकपरामर्शपरः ।
3. अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः ।
4. न्यायजन्यशाब्दज्ञानस्य ।
5. उचिता आनुपूर्वी येषां तानि उचितानुपूर्वीकाणि ।
6. उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम् ।
7. प्रथमतः तत्तद्वाक्यद्वाक्यार्थविषयकाः पञ्च बोधाः जायन्ते । तदनन्तरं पञ्चावयवार्थविषयकः समूहालम्बनबोधो जायते ।
8. अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वम् अवयवत्वम् ।
9. यो यो धूमवान् स स वह्निमान् ।
10. प्रतिज्ञाहेतू-हेतूदाहरणे-उदाहरणोपनयौ-उपनयनिगमने ग्राह्ये ।
11. समासाघटकपदार्थान्वितस्वार्थबोधकत्वं सापेक्षत्वम् ।
12. प्रतिज्ञालक्षणे साध्ये अतिव्याप्तिः ।
13. अवयवत्वन्तु न्यायाम्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम् ।
14. प्रतिज्ञादिभिन्नप्रतियोगिकभेदानुयोगितावच्छेदकरूपवत्त्वम् ।
15. साध्यनिर्देशः प्रतिज्ञा ।